योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः ०५

पञ्चमः सर्गः ५

श्रीराम उवाच ।

भगवन्सर्वधर्मज्ञ पूर्वापरविदां वर ।

अयं मनसि संसारः स्फारः कथमिव स्थितः ।। १

यथायं मनसि स्फारः संसारः स्फुरति स्फुरन् ।

दृष्टान्तदृष्ट्या स्फुटया तथा कथय मेऽनघ ।। २

श्रीवसिष्ठ उवाच ।

यथैन्दवानां विप्राणां जगन्त्यवपुषामपि ।

स्थितानि जातदार्ढ्यानि मनसीदं तथा स्थितम् ।। ३

लवणस्य यथा राज्ञश्चेन्द्रजालाकुलाकृतेः ।

चण्डालत्वमनुप्राप्तं तथेदं मनसि स्थितम् ।। ४

भार्गवस्य चिरं कालं स्वर्गभोगबुभुक्षया ।

यथा भोगाधिनाथत्वं संसारित्वं बभूव च ।। ५

भोगेश्वरत्वं च यथा तथेदं मनसि स्थितम् ।

श्रीराम उवाच ।

भगवन्भृगुपुत्रस्य स्वर्गभोगबुभुक्षया ।। ६

कथं भोगाधिनाथत्वं संसारित्वं बभूव च ।

श्रीवसिष्ठ उवाच ।

श्रृणु राम पुरा वृत्तं संवादं भृगुकालयोः ।। ७

सानौ मन्दरशैलस्य तमालविटपाकुले ।

पुरा मन्दरशैलस्य सानौ कुसुमसंकुले ।। ८

अतप्यत तपो घोरं कस्मिंश्चिद्भगवान्भृगुः ।

तमुपास्ते स्म तेजस्वी बालः पुत्रो महामतिः ।। ९

शुक्रः सकलचन्द्राभः प्रकाश इव भासुरः ।

भृगुर्वनवरे तस्मिन्समाधावेव संस्थितः ।। १०

सर्वकालं समुत्कीर्णो वनोपलतलादिव ।

शुक्रः कुसुमशय्यासु कलधौताजिरेषु च ।। ११

मन्दरोद्दामदोलासु बालो रमणलीलया ।

विद्याविद्यादृशोर्मध्ये शुक्रः प्राप्तमहापदः ।। १२

त्रिशङ्कुरिव रोदोन्तरवर्तत तदाकुलः ।

निर्विकल्पसमाधिस्थे स कदाचित्पितर्यथ ।। १३

अव्यग्रोऽभवदेकान्ते जितारिरिव भूमिपः ।

ददर्शाप्सरसं तत्र गच्छन्तीं नभसः पथा ।। १४

क्षीरोदमध्यलुलितां लक्ष्मीमिव जनार्दनः ।

मन्दारमालावलितां मन्दानिलचलालकाम् ।। १५

हारझाङ्कारिगमनां सुगन्धितनभोनिलाम् ।

लावण्यपादपलतां मदघूर्णितलोचनाम् ।। १६

अमृतीकृततद्देशां देहेन्दूदयदीप्तिभिः ।

कान्तामालोक्य तस्याभूदुल्लसत्तरलं मनः ।। १७

दृष्टनिर्मलपूर्णेन्दुवपुरम्बुनिधेरिव ।

साप्यालोक्य शुक्रमुखं तथा परवशा ह्यभूत् ।। १८

मनसिजेषु पराहतमाशयं

स परिबोध्य मनस्तदनूशना ।

विगलितेतरवृत्तितयात्मना

स च वधूमय एव वभूव ह ।। १९

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मोक्षोपायेषु स्थितिप्रकरणे भार्गवोपाख्याने भार्गवस्खलनं नाम पञ्चमः सर्गः ।। ५ ।।